# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा - आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ४** (C.C.- 4.1.3.) | **गुणाः - ७०** |
| विषयः - स्वामिनारायणवेदान्तः ( J ) | ग्रन्थः श्रीमद्भगवद्गीता (१-६ अध्यायाः, गोपालानन्दभाष्यसहिताः) | **समयः -२.०० तः ०५.००** |
| दिनाङ्कः - १८/१२/२०१८ | | |

**प्रथमान्वितिः**

**प्रश्नः १ एकस्य व्याख्यात्मकमुत्तरं यथाभाष्यं देयम् ।** ( ०५ )

(१) निमित्तानि च पश्यामि विपरीतानि केशव ! ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥

(२) स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥

**प्रश्नः २ एकस्य निबन्धात्मकमुत्तरं यथाभाष्यं देयम् ।** ( १० )

(१) अर्जुनस्य विषादावस्थां वर्णयत ।

(२) युद्धभूमेः अवस्थां सञ्जयधृतराष्ट्रसंवादरुपेणोपस्थापयत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ एकस्य व्याख्यात्मकमुत्तरं यथाभाष्यं देयम् ।** ( ०५ )

(१) न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥

(२) नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥

**प्रश्नः ४ एकस्य निबन्धात्मकमुत्तरं यथाभाष्यं देयम् ।** ( १० )

(१) आत्मनः स्वरूपं निरुपयत ।

(२) सांख्ययोगाध्यायस्य सारभागं लिखत ।

**तृतीयान्वितिः**

**प्रश्नः ५ एकस्य व्याख्यात्मकमुत्तरं यथाभाष्यं देयम् ।** ( ०५ )

(१) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥

(२) बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ! ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ! ॥

**प्रश्नः ६ एकस्य निबन्धात्मकमुत्तरं यथाग्रन्थं देयम् ।** (१०)

(१) कर्मणः स्वरूपं साधु प्रतिपादयत ।

(२) चतुर्थाध्यायस्य सारभागं लिखत ।

**चतुर्थान्विति:**

**प्रश्नः ७ एकस्य निबन्धात्मकमुत्तरं यथाग्रन्थं देयम् ।** (०५)

(१) सन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसन्न्यासात् कर्मयोगो विशिष्यते ॥

(२) अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः ॥

**प्रश्नः ८ एकस्य निबन्धात्मकमुत्तरं यथाग्रन्थं देयम् ।** (१०)

(१) कर्मसन्यासयोगस्य स्वरूपं निरुपयत ।

(२) षष्ठोऽध्यायस्य सारभागं लिखत ।

**प्रश्नः ९ दशानामतिलघूत्तराणि यच्छत ।** (१०)

(१) माधवः कः ?

(२) कुरुवृद्धः कः ?

(३) पाञ्चजन्यं कस्य शङ्खः ?

(४) परन्तपः कः ?

(५) पण्डिताः किं नानुशोचन्ति ?

(६) धीरः कुत्र न मुह्यति ?

(७) कर्मणः गतिः काऽस्ति ?

(८) कति विद्याः सन्ति ?

(९) अनघः इत्यस्य कोऽर्थः ?

(१०) निष्ठा कति विधा ?

(११) विवस्वतः कः ?

(१२) कति विधं तत्त्वम् ?

(१३) कति भूतानि ?

(१४) कति प्राणाः ?

(१५) भाष्यकर्ता कः ?

--००--